चीभितम्-तः, चीभितः, चिचीभिषितः, चेचीभितः-तवान् ;

चीभः, [1]चीभनः, चीभः, चिचीभिषुः, चेचीभः ;

चीभितव्यम्, चीभयितव्यम्, चिचीभिषितव्यम्, चेचीभितव्यम् ;

चीभनीयम्, चीभनीयम् ; चिचीभिषणीयम्, चेचीभनीयम् ;

[A]चीभ्यम्, चीभ्यम्, चिचीभिष्यम्, चेचीभ्यम् ;

ईषच्चीभः-दुश्चीभः-सुचीभः ; — — —

चीभ्यमानः, चीभ्यमानः, चिचीभिष्यमाणः, चेचीभ्यमानः ;

चीभः, चीभः, चिचीभिषः, चेचीभः ;

चीभितुम्, चीभयितुम्, चिचीभिषितुम्, चेचीभितुम् ;

[2]चीभा, चीभना, चिचीभिषा, चेचीभा ;

चीभनम्, चीभनम्, चिचीभिषणम्, चेचीभनम् ;

चीभित्वा, चीभयित्वा, चिचीभिषित्वा, चेचीभित्वा ;

प्रचीभ्य, प्रचीभ्य, प्रचिचीभिष्य, प्रचेचीभ्य ;

चीभम् २, } चीभम् २, } चिचीभिषम् २, } चेचीभम् २ ; }
चीभित्वा २, } चीभयित्वा २, } चिचीभिषित्वा २, } चेचीभित्वा २. }

## (531) "चीव भाषार्थः"

(X-चुरादिः-1775. सक. सेट्. उभ. आस्वदीयः) [अ]

चीवकः-विका, चिचीवयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककीटयतिवत् (194) ज्ञेयानि । [B]चीवनम् । क्विपि, [3]च्यूः-च्युवौ-च्युवः ; इति रूपाणि ।

---

1. 'अनुदात्तेतश्च हलादेः' (3-2-149) इति ताच्छीलिको युच् ।
2. 'गुरोश्च हलः (3-3-103) इति स्त्रियां भावादौ, अप्रत्ययः ।
3. क्विपि, णिलोपे, 'च्छ्वोः शूडनुनासिके च' (6-4-19) इति वकारस्य ऊठि, यणि रूपम् ।

[अ] अस्य धातोरास्वदीयत्वेन, 'आ स्वदः सकर्मकात्' (ग. सू. चुरादौ) इति वचनात्, कर्मसंज्ञकार्थान्वय्यर्थबोधकत्व एव णिज् भवति । अकर्मकत्वे तु नेति बोद्धव्यम् ।

A. 'प्रचीभ्यरेभैः पशवोऽम्भसांनिधिप्ररम्भणस्तम्भिभिरागता व्रजम् ।' धा. का.1 50.

B. 'नाहं वर्हयिताऽस्म्यबल्ह्यमपि भोः सर्वैरिदं गोप्यते
तांस्त्वं धूपय विच्छयन् क इव न स्वच्चीवनात् पोथयेत् ॥' धा. का. 3.44.